तमस्ततिः, स्त्री, ( तमसस्ततिः समूहः । ) अन्धकारसमूहः । इति तमिस्राशब्दार्थे मेदिनी ॥

तमस्विनी, स्त्री, ( तमो विद्यतेऽस्यामिति विनिः ङीप् च । ) रात्रिः । ( यथा, महाभारते । ४ । २१ । ३८ ।
"अदृश्यमानस्तस्याद्य तमस्विन्यामनिन्दिते ! । नागो विल्वमिवाक्रम्य पोथयिष्याम्यहं शिरः ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥

तमा, स्त्री, ( तमोऽस्त्यस्यामिति । तम+अच् टाप् च । ) रात्रिः । इति हेमचन्द्रः ॥ तमालवृक्षः । इति शब्दचन्द्रिका ॥

तमाः, [ स् ] पुं, राहुः । इति मेदिनी । से, २४ ॥

तमालं, क्ली, (तम्यते काङ्क्ष्यते इति । तमु काङ्क्षायाम् + "तमिविशिविड़ीति ।" उणां ।१।११७। इति कालन् । ) पत्रकम् । इति राजनिर्घण्टः ॥

तमालः, पुं, ( तमु काङ्क्षायाम् + कालन् । ) वृक्षविशेषः । तत्पर्य्यायः । कालस्कन्धः २ तापिच्छः ३ । इत्यमरः । २ । ४ । ६८ ॥ तापिञ्जः ४ । इति भरतः ॥ नीलतालः ५ तमालकः ६ नीलध्वजः ७ कालतालः ८ महाबलः ९ । ( यथा, भागवते । ३ । १३ । ३३ ।
"तमालनीलं सितदन्तकोट्या
क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग ॥")
अस्य गुणाः । मधुरत्वम् । बल्यत्वम् । वृष्यत्वम् । शिशिरत्वम् । गुरुत्वम् । कफपित्ततृषादाहश्रमशान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥ तिलकम् । ( यथा, कुट्टनीमते । १६ ।
"यस्यासुपवनवीथ्यां तमालपत्राणि युवतिवदने च । नखरप्रहाररचितं तन्वीवाद्येषु सुरतकलहेषु ॥"
तमालस्तापिच्छवृक्षः युवतिवदनपक्षे तिलकमिति ॥ ) खड्गः । वरुणवृक्षः । इति मेदिनी । ले, ९७ ॥ श्यामखदिरः । इति शब्दचन्द्रिका ॥ वृक्षभेदे वंशत्वचि च पुं क्ली । इति लिङ्गादिसंग्रहे अमरभरतौ ॥

तमालकं, क्ली, ( तमालपत्रवत् वर्णेन कायतीति । कै+कः । ) सुनिषण्णशाकम् । इति त्रिकाण्डशेषः ॥ ( तमालमेव । स्वार्थे कन् । ) पत्रकम् । इति राजनिर्घण्टः ॥ तेजपात इति भाषा ॥

तमालकः, पुं, क्ली, ( तमाल एव । स्वार्थे कन् ।) तमालवृक्षः । ( यथा, रामायणे । २ । ९१ । ५० ।
"ततः सरलतालाश्च तिलकाः सतमालकाः । प्रहृष्टास्तत्र सम्पेतुः कुब्जा भूत्वाथ वामनाः ॥") वंशत्वक् । इति शब्दरत्नावली ॥

तमालपत्रं, क्ली, ( तमालस्य पत्रमिव वर्णोऽस्यास्तीति । अर्श आदित्वात् अच् । ) तिलकम् । पत्रकम् । ( यथास्य पर्य्यायाः ।
"पत्रन्तमालपत्रञ्च तथा स्यात् पत्रनामकम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) तमालवृक्षः । इति मेदिनी । रे, ३०२ ॥ (तमालस्य पत्रम् । यथा, रघुः । ६ । ६४ ।
"तमालपत्रास्तरणासु रन्तुं
प्रसीद शश्वन्मलयस्थलीषु ॥" )

तमालिका, स्त्री, ( तमालाः सन्त्यत्र । तमाल+ठन् । ) ताम्रलिप्तदेशः । इति त्रिकाण्डशेषः ॥ ताम्रवल्ली । भूम्यामलकी । इति राजनिर्घण्टः ॥

तमालिनी, स्त्री, ( तमाली तमालवर्णोऽस्त्यस्या इति । इनिः ततो ङीप् ।) भूम्यामलकी । इति राजनिर्घण्टः ॥ ताम्रलिप्तदेशः । इति हेमचन्द्रः ॥

तमाली, स्त्री, ( तम+कालन् । गौरादित्वात् ङीष् । ) ताम्रवल्ली । वरुणवृक्षः । इति राजनिर्घण्टः ॥

तमिः, स्त्री, ( तम्यते ग्लायतेऽत्र । तम+"सर्व्वधातुभ्य इन् ।" उणां । ४ । ११७ । इतीन् । ) रात्रिः । इत्यमरटीकायां भरतः ॥

तमिस्रं, क्ली, (तमोऽस्त्यत्र । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४। इति निपातनात् साधुः । यद्वा, तमिस्रा अस्त्यस्य अस्त्यर्थे अच् ।) अन्धकारम् । इत्यमरः ॥ (यथा, महाभारते । ४ । २१ । १७ ।
"यदेतन्नर्त्तनागारं मत्स्यराजेन कारितम् । दिवात्र कन्या नृत्यन्ति रात्रौ यान्ति यथागृहम् ॥ तमिस्रे तत्र गच्छेथा गन्धर्व्वास्तन्न जानते ॥" ) क्रोधः । इति मेदिनी । रे, ६१ ॥ (नरकविशेषः । यथा, भागवते । ४ । ७ । ४४ ।
"अमङ्गलानाञ्च तमिस्रमुल्वणं
विपर्य्ययः केन तदेव कस्यचित् ॥" )

तमिस्रपक्षः, पुं, ( तमिस्रमन्धकारं तत्प्रधानः पक्षः । ) कृष्णपक्षः । यथा, तमिस्रपक्षत्रुटिकूटभक्षितमिति श्रीहर्षः ॥

तमिस्रा, स्त्री, ( तमोबहुलमस्ति अस्याम् । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् साधुः । ) अन्धकाररात्रिः । कृष्णपक्षनिशा । इत्यमरः ॥ तमोयुक्तरात्रिमात्रम् । इति रायमुकुटः ॥ दर्शरात्रिः । इति वाचस्पतिः ॥ तमस्ततिः । इति मेदिनी । रे, १६१ ॥ ( यथा, रघुः । ५ । १३ ।
"सूर्य्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा ॥")

तमी, स्त्री, ( तमिः कृदिकारादिति वा ङीष् । ) रात्रिः । ( यथा, माघे । ९ । २३ ।
"ददृशेऽपि भास्करकराह्वि न यः
स तमीं तमोभिरभिगम्य ततम् ॥")
हरिद्रा । इत्यमरः । २ । ९ । ४१ ॥

तमोघ्नः, पुं, ( तमोऽन्धकारं मोहमज्ञानं वा हन्तीति । हन+टक् ।) वह्निः । सूर्य्यः । (यथा, महाभारते । ७ । १४४ । १३६ ।
"स देवशत्रूनिव देवराजः
किरीटमाली व्यधमत् समन्तात् ।
यथा तमांस्यभ्युदितस्तमोघ्नः
पूर्व्वप्रतिज्ञां समवाप्य वीरः ॥" )
चन्द्रः । बुद्धः । केशवः । शम्भुः । इति मेदिनी । ने, ७१ ॥

तमोज्योतिः, [ स् ] पुं, ( तमसि ज्योतिर्यस्य ।) ज्योतिरिङ्गणः । इति शब्दरत्नावली ॥

तमोनुत्, [ द् ] पुं, ( तमोऽन्धकारं नुदतीति ॥ नुद्+क्विप् ।) अग्निः । सूर्य्यः । चन्द्रः । दीपः । इति शब्दरत्नावली ॥ (तमोनाशके, त्रि । यथा महाभारते । १३ । १६६ । ८ ।
"एवमुक्तस्तदाचिर्वै तमोनुदभवच्छशी ।
अभवत् सौम्यभावाच्च सोमवत् प्रियदर्शनः ॥")

तमोनुदः, पुं, ( तमोऽन्धकारं नुदतीति । नुद+"इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः । ) सूर्य्यः । इति शब्दरत्नावली ॥ (अग्निः । चन्द्रः । इति विश्वः ॥ यथा, रघुः । ३ । ३३ ।
"नरेन्द्रकन्यास्तमवाप्य सत्पतिं
तमोनुदं दक्षसुता इवाबभुः ॥"
प्रकृतिप्रेरकः । यथा, मनुः । १ । ६ ।
"ततः स्वयम्भुर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥")

तमोपहः, पुं, (तमोऽन्धकारं अपहन्तीति । अप+हन्+"अपे क्लेशतमसोः ।" ३ । २ । ५० । इति डः । ) सूर्य्यः । चन्द्रः । बुद्धिः । अग्निः । इति मेदिनी । हे, ३० ॥ ( अज्ञाननाशके, त्रि । यथा, किरातार्ज्जुनीये । ५ । २२ ।
"आगमादिव तमोपहादितः
सम्भवन्ति मतयो भवच्छिदः ॥" )

तमोभित्, [ द् ] पुं, ( तमस्तिमिरं भिनत्ति खद्योतिःप्रकाशेन नाशयतीति । भिद्+क्विप् । ) खद्योतः । इति शब्दमाला ॥

तमोमणिः, पुं, ( तमसि अन्धकारे मणिरिव । ) खद्योतः । इति त्रिकाण्डशेषः ॥ गोमेदकमणिः । इति राजनिर्घण्टः ॥

तमोलिप्ती, स्त्री, ( तमसा लिप्यते इति । लिप+क्तः निपातनात् ङीप् । ) देशविशेषः । तमोलुक इति भाषा ॥ तत्पर्य्यायः । ताम्रलिप्तः २ वेलाकूलम् ३ तमालिका ४ । इति शब्दरत्नावली ॥ ताम्रलिप्तम् ५ ताम्रलिप्ती ६ । इति त्रिकाण्डशेषः ॥ दामलिप्तम् ७ तमालिनी ८ स्तम्बपूः ९ विष्णुगृहम् १० । इति हेमचन्द्रः ॥

तमोविकारः, पुं, (तमसैव विकारो यत्र ।) रोगः । इति राजनिर्घण्टः ॥

तमोहरः, पुं, ( तमो हरतीति । हृ+अच् । तमस्य हर इति वा ।) चन्द्रः । इति शब्दरत्नावली ॥ ( अग्निः । सूर्य्यः । इति व्युत्पत्तिलब्धोऽर्थः ॥ )

तम्पा, स्त्री, ( तम्पति गच्छतीति । तम्प+अच् । पृषोदरादित्वात् साधुः । ) गौः । इति हेमचन्द्रः । ४ । ३३ ॥

तम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ओष्ठ्यवर्गशेषोपधः । तम्बति । इति दुर्गादासः ॥

तम्बा, स्त्री, ( तम्बति गच्छतीति । तम्ब+अच् ।) गौः । इति हेमचन्द्रः । ४ । ३३२ ॥

तय, ङ गतौ । रक्षे । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-सकं-सेट् । ) ङ, तयते । इति दुर्गादासः ॥